# चंद्रशेखराष्टकं

चंद्रशेखर! चंद्रशेखर! चंद्रशेखर! पाहिमां ।
चंद्रशेखर! चंद्रशेखर! चंद्रशेखर! रक्षमां ॥ 1

रत्नसानुशरासनं रजताद्रिशृंगनिकेतनं
शिंजिनी कृतपन्नगेश्वरमच्युताननसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदशालयैरभिवंदितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 2

पंचपादपपुष्पगंधिपदांबुजद्वयशोभितं
फाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेबरं भवनाशनं भवमव्ययं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 3

मत्तवारण मुख्यचर्म कृतोत्तरीय मनोहरं
पंकजासन पद्मलोचन पूजितांघ्रि सरोरुहम् ।
देवसिंधु तरंगसीकर सिक्तशुभ्रजटाधरं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 4

© 2022 Vedam Nadam 

यक्षराजसखं भगाक्षहरं भुजंग विभूषणं
शैलराजसुता परिष्कृत चारुवाम कलॆबरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 5

कुंडलीकृत कुंडलेश्वर कुंडलं वृषवाहनं
नारदादि मुनीश्वर स्तुतवैभवं भुवनेश्वरम् ।
अंधकांधकामाश्रितामर पादपं शमनांतकं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 6

भेषजं भवरोगिणां अखिलापदामपहारिणं
दक्षयज्ञ विनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्ति फलप्रदं सकलाघ संघनिबर्हणं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 7

भक्तवत्सलमर्चितं निधिमक्षयं हरिदंबरं
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।
सोमवारिदभूहुताशन सोमपानिलखाकृतिं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 8

© 2022 Vedam Nadam

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरंतमपि प्रपंचमशेषलोकनिवासिनम् ।
क्रीडयंतमहर्निशं गणनाथयूथसमन्वितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 9

मृत्युभीत मृकंडुसूनु कृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगतां अखिलार्थ संपदमादरं
चंद्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ 10

॥ इति श्रीचंद्रशेखराष्टकं संपूर्णम् ॥

© 2022 Vedam Nadam